शास्त्री-II खण्ड साहित्य

रघुवंशमहाकाव्यम्

त्रयोदशः सर्गः

classmate

Date

Page

प्र०१०- एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः ।
प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालम् ॥

उत्तरम्- प्रसङ्गः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति—

अयि सीते ! पुष्पकविमाने समारूढा वयं विमानस्य शीघ्रगत्या अतित्वरितं सागरपश्चिमतीरमुपागताः, यत्र बालुकामयभूमौ स्फुटिताभिः शुक्तिभिः परिक्षिप्तानि इतस्ततो विकीर्णानि मुक्ताफलपटलानि विलोक्यन्ते । यत्र वा क्रमुकतरुततयः फलैरवनताः कामप्यपूर्वां सुषमां जनयन्तीति भावः ।

व्याख्या- एते = इमे । वयम् = विमानारूढा रामादयः । सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलम् = बालुकामयस्फुटितशुक्तिपरिक्षिप्तमौक्तिकसमूहम् । फलावर्जितपूगमालम् = फलानमितक्रमुकपंक्तिः । पयोधेः = समुद्रस्य । कूलम् = तीरम् । विमानवेगात् = व्योमयानजवात् । मुहूर्तेन = अल्पकालेन । प्राप्ताः = आसादिताः, समागताः ।

Renu Devi
02/11/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-I खण्ड साहित्य

अभिज्ञानशाकुन्तलम्
षष्ठोऽङ्कः

आतम्महरिअपंडुर जीअसव्वस्स वसंतमसस्स ।
दिट्ठो सि चूदकोरअ उदुमंगल तुमं पसाएमि ॥
[आताम्रहरितपाण्डुर जीवितसर्वस्व वसन्तमासस्य ।
दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि ]॥

उत्तरम्- प्रसङ्गः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके नवोद्गतताम्रकोरकमवलोक्य प्रथमा चेटी = तयोरेका हृष्टमना चेटी तमवलोकयन्ती वदति- आताम्रेति ईषत् ताम्रः आताम्रः आताम्रश्च हरितश्च पाण्डुरश्चेति आताम्रहरितपाण्डुरः तत्सम्बुद्धौ हे आताम्रहरितपाण्डुर! ताम्रश्यामलशुभ्रेति- वर्णत्रयमिश्रित। वसन्तमासस्य = मधुमासस्य चैत्रस्य जीवितसर्वस्व = जीवनसारतमः। ऋतुमंगल! = ऋतोः वसन्तस्य मङ्गल! प्रशंसा। वसन्ते श्रेयस्कर। चूतकोरक! = आम्रमुकुल! दृष्टोऽसि त्वमद्य दैवात् अवलोकितोऽसि त्वां भवन्तं प्रसादयामि = स्वागतं व्याहरामि त्वं तथा प्रसन्नो भव यथाऽस्मिन् वसन्तेऽहं सुखं वसेयमित्यर्थः। अत्र स्वभावोक्तिरलङ्कार आर्याछन्दश्च ।

Renu Devi
02/11/20

राधा उमाकान्त सं० महाविद्या० सुखसेना, पूर्णिया ।

उपशास्त्री - I खण्ड साहित्य तृतीय पत्रम्

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

classmate

Date
Page

प्र०(1)- अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन श्लोके वनेचरः युधिष्ठिरं प्रति कथयति - करदैर्भूपैरुपहारीकृतानां मत्तमातङ्गानां मदजलैस्तत्रागतानेक राजपुत्राणां रथैरश्वैश्च सङ्कीर्णं दुर्योधनस्य सभाभवनप्राङ्गणे पिच्छिलता संजाता ।

व्याख्याः - अयुग्मच्छदगन्धि = सप्तपर्ण (सतवन) के समान गन्धवाला, नृपोपायनदन्तिनां = राजाओं द्वारा उपहार में दिये गये हाथियों का, मदः = कपोलों से निकला हुआ जल, अनेकराज राजन्यरथाश्वसंकुलं = अनेकों राजपूतों के रथों और घोड़ों से भरे हुए, तदीयं = उस दुर्योधन के, आस्थाननिकेतनाजिरं = सभामण्डप के आँगन को, भृशं = अत्यन्त, आर्द्रतां नयति = गीला कर दे रहा है

Ronu Devi
02/11/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री - II खण्ड साहित्य तृतीय पत्रम्

classmate Date Page

## किरातार्जुनीयम् - प्रथमः सर्गः

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति - दुर्योधनः चिराय प्रजापालनतत्परः सस्यवृद्ध्यर्थं कृत्रिमनदी- (नहर) प्रभृत्युपायैः सेचनोद्योगं विधाय एवं करोति यत् तस्याः कृषकाः विना प्रयासेनैव स्वयं जातानीव सस्यानि लेभिरे ।

व्याख्या :- चिराय = बहुत समय से, तस्मिन् = उस दुर्योधन के, क्षेमं वितन्वति सति = (प्रजाओं का) कल्याण कारक होने पर, अदेवमातृकाः = जो बादलों के पानी से नहीं सींचे जाते ऐसे, कुरवः = कुरुदेश, कृषीवलैः = किसानों द्वारा, सुखेन = आसानी से, लभ्याः = पाने योग्य, सस्यसम्पदः = धान्य सम्पत्तियों को, दधतः = धारण करते हुए, चकासति = शोभित हो रहे हैं

Renu Devi
02/11/20

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया